M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 904

Title : Nyaya [illegible]

704

704

Book on ज्योतिष

Incomplete

:	:	:	**Title**
:	:	:	Author
:	:	:	Editor
:	:	:	Year, Vols.
:	:	:	Publisher
704 :	:	:	Remarks

।।७। गिकालेप्यभावव्यवहारप्रसंगात् प्रागभाववद्युत्पादनं नहि सोधितुं यदा अभाववादिना घ्वभावज्ञानकारणम
नुगतोऽस्ति तत्र बुद्धिविशेषः स्यात् कार्यमिदं सत् भावेभ्यः प्रमेयं प्रमाणं वेद्यस्य प्रकाशात्वात् बुद्धीनां ननु तन्मात्रबुद्धेरभा
।।५ वत्वे तस्याः स्वप्रकाशत्वे प्रतियोगिज्ञानापेक्षानवस्थादिति चेत् न ग्रहणे तदपेक्षा किंतु व्यवहाराय ज्ञानसत्या
मिच्छायां व्यवहारार्थिमाधिकानपेक्षणादिति चेत् न दृष्टा हि व्यवहारार्थमधिकापेक्षा यथा परिमाणादावव्यवहारेत
था हि अधिकसंख्यावच्छिन्नत्वं अवृत्तत्वाप्यवच्छेदः परिमाणस्य दीर्घत्वं तद्विपरीतं ह्रस्वत्वं ताद्दृशपरिमाणभाव
यद्वि ग्रह समकालमेवानुभूतं दीर्घव्यपदेशस्तत्व्य संख्यावच्छिन्नहस्तावितस्त्याप्यवच्छेदपरिमाणज्ञानमपेक्षते
तन्मात्रबुद्धेरभावत्वे स्वप्रतियोगिज्ञानापेक्षाश्रयतासंपत्त्यर्थं अतएव सूक्ष्मकरणकीटादिजिज्ञासायार्थवती नचत
न्मात्रबुद्धेरभावत्वे तद्विनाशो अभावाभावे भावो न्याय्य अनवस्थासंगइति वाच्यं यथा घटाभावो बुद्धिस्तथा बुद्ध्यभाव
स्यापि बुद्ध्यंतरत्वात् निर्जनेवंधविच्छेदे जातु निःसरणानानुपपन्नमनु [illegible] भावे पिपासिको दादिबुद्धि विशेषसं
भवात् मोक्षे पुरुषांतरस्य नियमेन प्रमाणानांनास्ती निवेत् न कार्याकारणकल्पनात् नचैवं बुद्धिनाशे पुनः संसा
रिनापत्तिः बुद्धिधानासंभवात् नदसर्वमुक्तिः प्रमाणाभावात् प्रतियोगिमदधिकरणाभिन्ना [illegible]
स्याभावत्वे सर्वसमंजसमिति पूर्वः पक्षः सिद्धांत [illegible] सप्रतियोगिकाभावो गम्यते यदो [illegible] नेसनुभ ।।१५

योगिनि बुद्धिस्थे अधिकरणे ऽपात ज्ञानस्य वाऽभावस्योपलम्भादिति चेन्न भूतलेन [illegible] नि वा घटवद्भिन्नत्व
स्य घटवद्भूतलज्ञानाभिन्नत्वस्य वा दोषवशेनानिश्चयात् भूतलज्ञानस्वरूपाणामननुगमात् [illegible] त्वमनुगत
व्यवहार इति चेन्न अभावेपि तुल्यत्वात् नव्यभावत्वं नाम सामान्यं अभावसंगतान्योन्याभावावधि वा कल्प्य
न च भावविरोधित्वं विरोधस्याभावनिरूप्यत्वात् भावाभावयोः सहानवस्थानाभावस्य स्वरूपानतिरेकाच्च ला
पि भावप्रतियोगित्वं प्रतियोगित्वस्याभावविरहरूपत्वात् अभावाभा [illegible] भावाप्रतियोगिकत्वाच्च नापि स्वप्रति
योगित्वं समवायसंबन्धेनाभावानामपि तथात्वात् नापि परकीयस्य भावत्वे [illegible] नादिगतत्वात् स्वभावगत् अस्य स्वरू
पाश्रितत्वेनाननुगतत्वाच्च नापि सत्ताश्रयत्वं सत्ताया अनुगतत्वात् स्वरूपत्वे [illegible] भावरूपत्वाच्च सत्तायाः [illegible] भावत्वेन
भावत्वे ऽत्यन्ताभावस्याभावत्वानवगतावप्यवगत इति चेन्न अभावे अभावानभ्युपगमात् तथात्वेनैव तदन
भ्युपगमात् सत्ताबोधविधुरत्वमभावत्वं सामान्यादौ सत्तावगमेपि बाधात् मास्तु एते अभावस्यानुगतेनाधितस्यैव प्र
तीतेरिति चेन्न विरोधित्वस्य स्वरूपानतिरेकात् सहानवस्थाननियमो विरोध इति चेन्न अनुपलभ्यमानस्याभाव
त्वेनाभ्युपगमाश्रयात् भावाभिन्नत्वमिति चेन्न भेदस्य स्वरूपान्योन्याभावरूपत्वे उक्तदोषात् वैधर्म्यं [illegible] समानत्वा
त् प्रागभावत्वादेरभावनिरूप्यत्वाच्च एवं भेदाभावेपि नानुगमः कदाचित्किं [illegible] कनस्य स्वरूपविशेषादेव घटस्यापि
य व्यवहारोऽस्त्विति चेन्न भूतलविलक्षणघटानुभवात् एकैकत्वाभावानुगत इति चेन्न तस्य नियतत्वे न प्रतियो

वात् ननु ज्ञानमात्रेऽभावविशिष्टविषयत्वं प्रतियोगिनः प्रतियोगिज्ञानाधीनज्ञानत्वं वाभावस्यानुभवसाक्षि
के गोसादृश्यादिवत् न केवलमधिकरणे तज्ज्ञाने वाभावः प्रतियोगिज्ञानं विनापि तद्धि ते न हि तेन घ
तियोगिनो विषयत्वाच्च सप्रतियोगित्वाभावेच्च कस्य प्रतियोगी घटः अथ केवलमधिकरणे तज्ज्ञाने वाभा
वः स्वाप्रतियोगिक एव अभावव्यवहारस्तु प्रतियोगिज्ञानमपेक्षते इति तस्य प्रतियोगी घटः घटेतरदभावव्य
वहारयोर्विरोधादिति चेन्न घटो नेति न अर्थस्य प्रतियोगी घटोनुभूयते न त्वभावज्ञानानेतर भाविनो भावव्य
वहारस्य तस्याभावानुभवसमयेऽप्रतीतेः व्यवह्रियते सोनच्चानुभूयत इति चेत् न तादृशानुभवं विना तथाव्य
वहाराभावात् व्यवहारे प्रतियोगिज्ञानापेक्षेस्त्यपि न युक्ते व्यवहर्त्तव्यज्ञानस्य सप्रतियोगिकाभावव्यवहारेऽधिकापे
क्षाया अदृष्टत्वात् लाघवादिहतथा कल्प्यते न त्वभाव इति चेत् न व्यवहारमात्रे तथाकारणस्यावधारणा
त् व्यवहारविशेषस्याननुगतत्वात् दीर्घत्वह्रस्वत्वे परिमाणान्तरे एव तत्त्वापाधिकात्यसंख्या वेद्धिन्न ह्रस्वा
पवच्छेदत्वं परिमाणे ह्रस्वत्वं दीर्घत्वं वाधिकान्यावधि ज्ञानाधीनो अतो ऽवसमकालीनपरिमाणानुभवेपि ना
नुभूतमिति न तदा तद्व्यवहारः गोसादृश्यं यद्यपि गवयगतानि सादृश्यानि तज्ज्ञानसमकालमनुभू
तानि तथापि गोत्वत्वसति गवयवृत्तित्वं गोसादृश्यत्वं गोज्ञानाधीनज्ञानमिति न तदा सादृश्यव्यवहारः

चिंता

स्यादेतत् अस्ति तावत् कस्यचित् ज्ञानात् भूविदभावपदप्रयोगः सर्वसिद्धः तत्र प्रयोगकाले तत्र भूत
ले घटवदतिरिक्ताप्रकाशात् ततश्च यदपेक्षया भावपदप्रयोगविषयत्वं तत्र तस्याभाव इति
रूपे षतेत बुद्धिजनिताभावपदप्रयोगविषयत्वमेव घटभूतलयोः प्रतियोग्यनुयोगिरूपः संबंधः
५१ अत एव भूतलस्य सप्रतियोगित्वेन बुद्धिजनिताभावपदप्रयोगविषयत्वेन तद्बुद्धिं विना अभावपदप्र
योगाविषयत्वात् अनेनैवोपाधिनार्थेऽभावपदव्युत्पत्तिग्रह इति तन्न अभावपदप्रयोगकाले घटेन भू
तलेन हि भूतले घटाभाव इति प्रतीतिप्रयोगो अपि तु भूतले घटाभाव इति भूतले घट इति वत् भूतले
घटो नास्तीति भूतलाधिकरणतानिरूपकत्वे न अर्थप्रकाशात् अपि च घटबुद्धिजनिताभावपदप्रयोगविष
यत्वं भूतलस्य घटाभावत्वं। तथा च घटाभावत्वेन स्यावगतेः घटाभावपदप्रयोगविषयत्वं घटाभावपदप्रयोग
विषयत्वेन तस्य घटाभावत्वमित्यन्योन्याश्रयः। पदप्रवृत्तिनिमित्ते वगते पदप्रयोगनियमात् घटाभावत्वं ५१
वघटाभावपदे प्रवृत्तिनिमित्तं यदि च भूतलं सप्रतियोगिकं प्रतियोगिनं विना न भासेत साहित्यादिवत् घ
टाभावपदप्रयोगदशायां तत्सप्रतियोगिकं नान्यदिति चेत् तर्हि घटप्रतियोगिकत्वेन तस्य घटबुद्धिजनिताभाव
पदप्रयोगविषयत्वं सति तस्मिन् घटप्रतियोगिकत्वमित्यन्योन्याश्रयः केवलस्याप्रतियोगिकत्वात् एवं

घटो बुद्धिजनितसदभावपदप्रयोगविषयत्वं गवयस्य गोसादृश्यमनुकृतमतिरिक्तसादृश्येनेति सप्र
तियोगिकपदार्थापलापः। अपि च न केवलं भूतलमभावः भूतलाभावयोराधाराधेयभावानुभवात् अ
भेदे तु तदनुपपत्तेः। दुःखवदात्मभिन्नस्यात्मनो दुःखाभावत्वे मोक्षस्यापुरुषार्थत्वप्रसंगः। आत्मनोऽसाध्य
त्वात्। अथ घटवद्भूतलज्ञानभिन्नं भूतलज्ञानमभावः तस्य भूतलाधारतास्वरूपसंबंधेनानुभू
यत इति चेत् न ज्ञानस्याप्रतियोगिकत्वेनाभावत्वानुपपत्तेः विरुद्धत्वात् अपि च तज्ज्ञानं किं स्वरूपसदे
वाभावव्यवहारकारकं भूतलाधिकरणनिषेधरूपतया वानुभूयमानं वा। नाद्यः स्वरूपसतो भूतलाधेय
तयाप्रतीत्यनुपपत्तेः। न द्वितीयः घटवद्भूतलज्ञानस्य तदानीमनुपस्थितेः तद्भिन्नज्ञानस्याप्रत्येतुमशक
त्वादित्युक्तत्वात्। किं च यदि घटवद्भूतलज्ञानाद्भिन्नं भूतलज्ञानमभावस्तदा घटवति दोषात् घटव
त्त्वाज्ञाने भूतलज्ञानमभावो भवेत्। तथा च तदेव तदेव घटवत् घटाभाववच्च स्यात्। तस्मान्न च घटाभावत
ज्ञानतद्वत्त्वयोर्विशेषादिनोविरोधाबाधात्। अथ वस्तुतो घटवतो भूतलस्य ज्ञानात् भिन्नं भूतलज्ञा
नमभावः न च घटवति भूतलज्ञानं तथा। व्यवहारस्तु विशेषादीनपाति घटाभावादिनि चेत् तर्हि घटवतो
भूतलस्य ज्ञानाद्भिन्नत्वेन ज्ञाने भूतलज्ञानमभावव्यवहृतिहेतुः न च न संभवति तत्प्रकारेणानुव्यवसा

कृ॰ मू॰
५८ येन वा अधिकरणज्ञानेन तदप्रकाशनात् तेन तत्प्रतियोगिनोऽनुपस्थितेः नन्वज्ञानान्तरेण तथानुभवः पो
ग्यानुपलब्धिगतत्र घटाभावनिश्चयं विना तथा निश्चेतुमशक्यत्वात् अपि च अधिकरणज्ञानानाम
ननुगतत्वेनानुगताभावव्यवहारानुपपत्तिः न चातिरिक्ताभावपक्षेपि तथाभावत्वस्यानुगतस्याभावादिति
बाच्यं अनुगताभावत्वं विनापि घटादिर्न पट इति समानाधिकरणनिषेधानुगतव्यवहारः घटान्योन्याभा
वेनैकेन एवं घटादौ न गोत्वमित्यनुगतव्यवहार एकेनात्यन्ताभावेन। कपालेषु भूतले इदानीं घटो विनष्ट
इत्यनुगतव्यवहारो ध्वंसेनैकेन। घटानुत्पाददशायामेतेषु घटो नास्तीत्यनुगतव्यवहार एकेन प्रागभावेन।
एवं वा नोनुगतनिषेधव्यवहाराः चतस्रो निरेव व्यक्तिभिः क्रियन्ते न च तावच्चतुष्टयं तदधिकरणेन तद्
ज्ञीनामननुगतत्वान्नस्यं भवति। अनुगताभावचतुष्टयव्यवहारस्य प्रत्येकाभावेनोपपादयितुमशक्यत्वा
दिति अतिरिक्ताभावव्यक्तिचतुष्टयसिद्धिः तस्य चतुष्टयस्याभावत्वेनैकपदार्थत्वेन तथानुपदर्शव स्यामष्ठ।
स्यादेतत् यस्मिन्समयविशेषे यत्र भूतलेऽभावः परैः स्वीक्रियते तेन समयविशेषयोग एव भूतल ५८
स्य घटाभावः एवं न इह भूतले घटो नास्तीत्याधाराधेयभावप्रतीतिरप्युपपद्यते समयविशेषयोगस्य
भूतलवृत्तित्वात् न च समयविशेषयोगस्याभावत्वेऽननुगमो दोषः अतिरिक्ताभावपक्षेपि तुल्यत्वात्

अभावत्वस्याज्ञानेरूपाधेर्वाऽसत्त्वात् यदि वाभावप्रतीतिप्रयोगानुगमार्थं तत्र धर्मान्तरं स्वीक्रियते तेन दा
समयविशेषयोगत्वस्यैव तदस्तु लाघवादिति न च समयविशेषयोगस्यानित्यत्वानि योगित्वेनाभावव्य
वहारासामर्थ्यात् भूतलवत् समयविशेषोपि अभावाधारतयानुभूयते इदानीं भूतले घटो नास्तीति
प्रतीतेः न च तत्समयविशेषेण समयविशेषयोगेऽभेदे सर्वदैवानुपपन्ना आधाराधेयभावाभावात् अपि च
समये किमभावाश्रयत्वेन विशेषः न च तत्समयस्वरूपैवाआधेय अभावस्वीकारः इति येन नुगमः समन्वेतार
भावव्यक्तेरेव तथा नाना समयवृत्तित्वात् किं च समयविशेषयोगादिदानीं भूतलमिति धीप्रयोगौ स्यातां वि
शेषणस्य प्रकारकविशिष्टप्रत्ययजनकत्वात् ननु भूतले घटाभाव इति यदि तत्समयविशेषयोगात् भू
तले घटाभावव्यवहारः तदा यादृशि समये स्थानविशेषविशिष्टे कपाले घटो वर्तते तादृशकपालादिकमेव त
त्समयविशेषयोगात् घटादिव्यवहारजनकमस्तु किं घटादिना प्रतीतिश्चानुत्पत्तेश्च एतेन दृष्टस्याद
दर्शे घटोत्र निपतन् दृष्टस्तथा मुद्गरो दृष्टः अवयवपरंसीहतिः परमितोऽभावेन दृष्टापरः तेनाभाव इति श्रुतिः
कुलि हिता किं वा ततः कपालमालाधीनाकलशस्य केवलमपि दृष्टकपालावली ति निरस्तं मुद्गरपातादिना
शे घट इति प्रतीत्यातिरिक्तविनाशानुभवात् न च केवलं भूतलं तदुक्तिर्बा न ज्ञान्याते न विनापि तयोः स

स्यात्॰ न च मते तयोरभावमात्रत्वेन विनाशाप्रयोगात्॰ योग्याऽभावमात्रस्य विनाशापत्तेः॰ अथ द्वमते
यद्विनाशकं तद्देवतत्सहितं भूतलं ज्ञाने वा विनाश इति चेन्न मुद्गरपातजन्यो हि विनाशोऽनुभूयते न च
५८ नस्यैव तज्जनकं प्रतियोगिकस्य विनाशोऽनुभूयते न मुद्गरपातं तथा॰ न च भावेन समं भूतलस्य सं
बंधाभावात् कथं भूतले घटाभावप्रत्ययः स्वरूपसंबंधादिति चेन्न तर्हि घटवद्भूतलस्य वक्तरा पाभावेन स्व
रूपसंबंधोक्तिः भूतलमभावान्वेत्यतोऽधिकस्य स्वरूपसंबंधस्याऽभावात्॰ प्रतियोग्यानोप एव स्वरूपसंबंधः
अत एवायोग्यनिषिध्यत इत्युच्यत इति चेन्न तत्राभावसंबंधेऽस्यानोपः स एव तत्राभावसंबंध इत्युक्त्योन्या
श्रय इति चेत्॰ न संबंधांतरमंतरेण विशिष्टप्रत्ययजननयोग्यत्वस्य स्वरूपसंबंधत्वात्॰ न च घटवद्भूतल
वद्वीपनदभावयोः परस्परविशिष्टप्रत्ययः ज्ञानविषययोः समवायसमवायिनोरिव संबंधसंबंधाभ्युप
गमेनानवस्थाऽभियाऽतेसंबंधसंबंधिनोरपि तादृशसंबंधस्वीकारादिति सिद्धोऽधिकोऽभाव इति तद्ग्राहि
काविशेषणतेति सिद्धमेतस्योऽभावसन्निकर्षः प्रत्यक्षविशेषकारणं विषयेणालोकसंयोगश्चेत्युक्तकारणं॰
नवस्तुषाश्चकाशस्येन चक्षुषांधकारस्यस्याग्रहणात् वैपरीत्ये च ग्रहात्॰ नन्वेवं परभागावच्छेदेनालोक ५९
संयुक्तोपि घटो ग्रस्येत न तावयविग्रहसामग्र्याः स्वावयवग्रहसामग्रीनियमात् परभागावच्छिन्नोऽन्यह

स्य न इति वाच्यं॰ अणुके व्यभिचारात्॰ प्रत्यक्षावयवावयविनिवसामग्रीभेदकल्पने मानाभावात्॰ अथाभि
मुखावयवावच्छेदेन घटालोकसंयोगः कारणं नर्ह्यभिमुखावयवावच्छेदेन चक्षुरालोकसंयोगोपि हेतुर
स्तु॰ यदि वालोकसंयोगावच्छिन्ने चक्षुःसंयोगस्तथा । समानदेशतानियोगेऽपि भित्तिवर्त्मयोरेव॰ अन्यथा पट
महारजनयोर्घटोदकयोश्चायहवसंगः॰ नर्हि घटसंयोगावच्छिन्नचक्षुषालोकसंयोगः कारणमस्तु॰ अपि
वालनीन्यायेनालोकसंयोगसंनिहिते चक्षुर्घटसंयोगः कारणं॰ तदा घटचक्षुःसंयोगसन्निहिते चक्षुषालो
कसंयोगो हेतुरस्त्विति चेन्न मैवं अन्वयव्यतिरेकाभ्यां विषयालोकसंयोगस्य हेतुत्वे निश्चिते तेनैवोपपत्तौ न
चक्षुरालोकसंयोगः कारणं कल्प्यते॰ अन्येनु॰ द्वयोरालोकसंयोगयोः कारणत्वे विषयालोकसंयोगः कारण
मेवेति॰ नन्वभिमुखावयवावच्छेदेन विषयालोकसंयोगस्य कारणत्वे आवश्यकत्वादवयवालोकसंयोग
एव हेतुरस्त्विति चेन्न॰ न अवयवसंयोगमात्रस्यातिप्रसक्तेः स्वावयवसंयोगोव क्रव्य॰ तथा च स्वसंयोग ए
हेतुः लाघवात् अवयवसंयोगेनान्यथासिद्धौ कारणत्वे च न स्यात् संयोगस्येत्यलं॰ आलोकस्योद्भूतरूपम
पि चाक्षुषे अन्वयव्यतिरेकित्वात् ननु तेजः कारणतावच्छेदकं उष्णादिना चक्षुषत्वाभावात्॰ न च त्वा
तीन्द्रियेण्वन्वयव्यतिरेकित्वात् द्वयोरपि हेतुत्वमन्यथा सहकार्युच्छेदादिति वाच्यं॰ उद्भूतरूपतेजोमात्र योस
वधाने कार्यानुदयादिति चेन्न॰ न उद्भूतरूपतेजस्त्वं तेजस उद्भूतरूपं वावच्छेदकमिति विनिगमनाविरहा

द्भवाभावादुभयोरपि हेतुत्वात् दंडचक्रयोरिवैकैकं विहायापरस्यान्वयव्यतिरेकाभावात् एवं चक्षुरूपम
पि बीजकं बीजकं तेजोरूपत्वात् आलोकवत् रूपस्पर्शव्यंजकत्वेनोद्भूतरूपत्वे तेजोगतोद्भूतरूपं बीजानो
पाधिः। व्यभिचारे गौरवेणाप्रयोजकत्वात् किंतु बीजकरूपत्वमेव तथा लाघवात् विषयस्येमपि रूपमुद्भू
४० तं सहकारि उद्भवत्वे समाने इंद्रियालोकादिसमासन्ने महद्द्रव्यविवायूपनीतस्य रसमीनसुमुखचक्षुरादिकैसा
क्षात्कारः स्यात् गरिविक्षसमवधानशून्यं अप्रत्यक्षत्वात् अंधकारस्थघटवदिति। नच्छुक्ला दर्णे लाघवाद नु
गतं सामान्यं रूपादिवृत्ति न द्रव्यगतं कुष्मादौ स्पर्शग्रहे रूपस्य प्रभादौ रूपग्रहे स्पर्शस्य ग्रहणप्रसंगात् किं
द्भवत्वेकार्थसमवायाविशेषात् अन्यथा स्पर्शरूपयोर्ग्रहणप्रसंगात् नाप्युभयवृत्ति रूपादिवृत्तित्वेनैवो
पपत्तेः। रूपस्पर्शयोस्तत्तन्नाना एकग्रहेऽपरग्रहात् नवरूपत्वादिनापेनापदपदाभावानुपपत्तिः। नार
वादिवन्नानात्वात् रूपादिप्रत्यक्षे एकैकोद्भवस्यैव प्रयोजकत्वात् ननु महत्त्वएवोद्भूतत्वमस्तु तदेव प्रत्यक्षत्वे तंत्रं ला ६०
घवात् ननु रूपेऽपि गौरवादिति चेत् न आश्रयमहत्त्वोद्भवाभावेऽपि जीवस्पर्शयोः प्रत्यक्षत्वेनोद्भूतत्वमितिप्रत्य
क्षमूर्तविशेषगुणत्वेन रूपेपुद्भूतत्वात् न महत्त्वे सामान्यगुणत्वात् अथानुद्भूतत्वमेव जातिः अप्रत्यक्षप्रयो
जकत्वेन सा स्यादेव तत्कल्पनात् तदभावाप्रत्यक्षत्वमिति चेन्न अप्रत्यक्षतायां उत्सेत्ये कारणविरहप्रयोज

वेन अप्रत्यक्षकारणस्य लाघवेन जातेः कल्पनात् ननु प्रतिबंधकत्वेनानुद्भूतत्वं कल्प्यपि वा न तदभावः कारणं गौरवा
दिति संप्रदायः॥ वयं तु ब्रूमः॥ शुक्लत्वादिना कारणत्वे रूपाग्निसंयोगजन्ययोरुभयोरपि जातित्वं चपरापरभावानुप
पत्त्या रूपत्वस्योद्भवत्वमनेकव्यक्तिवृत्तिं तथा चोद्भूतत्वेन कारणत्वेनानुगमः तस्मादनुद्भूतत्वं शुक्लत्वादिव्याप्यं नाना जातिः
तदभावकूटस्य प्रत्यक्षत्वे प्रयोजकः। अन्यथानुगतप्रत्यक्षतानुपपत्तेः। एवं स्पर्शादावपि अथवोद्भूतत्वमनुद्भूतत्वं वा
न जातिः। किंतु रूपत्वव्याप्यव्याप्यजातिमत्त्वमेवोद्भूतत्वं तदभावोऽनुद्भूतत्वं प्रत्यक्षरूपे शुक्लतरतमादिजातिसत्त्वा
त् उष्णवस्तुनादिरूपे तु शुक्लत्वमात्रमेव न व्याप्यजातिमात्राभावात् उत्कर्षाद्यभावात् न च रूपत्वमेव मानं ला
घवेन तस्य प्रयोजकत्वे प्रत्यक्षत्वप्रसंगात् एवं स्पर्शादावपीति दूतोऽपि महत्त्वे नोद्भूतत्वं प्रयोजकं वाय्वादौ महत्त्वोत्क
र्षेप्यप्रत्यक्षत्वात् ननु भर्जनकपालगतो वह्निर्वारिस्थघटबहिर्गतकस्य रतेजश्च न गृह्येत वारिकपालयोः संबंधे
पि प्रत्यक्षत्वेनोद्भूतरूपत्वात् तयोः संयोगविशेष एव प्रतिबंधक इति चेन्न जलकपालादीनामालोकवत्त्यागतपा
तद्रूपप्रतिबंधकत्वाभावात् प्रतिबंधकत्वे वा भर्जनकपालवारिसंयोगिवह्निसोपालोकयोरग्रहणप्रसंगः। संयोगानुग
तजातिकृतो विशेषः। अन्यतरकर्मजत्वादिनासंकरप्रसंगात् नापरत्वं च नानात्वे गौरवात् नापि तत्तत्संयोगत्वेनानु
गमादिति चेन्न जलस्थं तेजो गृह्यत एव उभयोः स्वच्छतया विविच्य ग्रहणं न भवति भर्जनकपाले [illegible] रूपमु
द्भूतस्पर्शमिन्यदेव तेजः तादृशौरव यवेवह्निस [illegible] ह चरितेना [illegible] स्यते अतितप्ततैलादौ कस्पवितदुद्भूत [illegible] पानीयवप्र

वेशात्तद्व्यवहारं सोपि। नन्वेवं दुग्धसहचरितदधिपरमाणोरेव दध्यारंभः दुग्धध्वंससमनंतरं द्व्यणुकेन स्वं दुग्धवद्
ध्वंसोपि दुग्धोपादानोपादेयत्वात्‌· नन्वेवमुद्भूतरूपवत्त्वादुद्भूतस्पर्शो नास्ति· नत्सद्दर्शनेन तेजोत्वं रसस्त्वनि
५८ यमेन तन्त्रोष्णबुद्धेरुपपत्तेः। उद्भूतरूपोद्भूतस्पर्शसामग्र्योः कुत्रापि प्रभादौ विनो धाव धारणाश्चेति चेन्नः नन्वे
वह्निमरीचौ नैस्पृशामीत्यबाधितानुभवबलोद्दर्शनस्पर्शनाप्रभावह्नौ रूपस्पर्शयोरुपलंभात्‌· नव्यतेजस्त्वं बा
धकं· उद्भवानुद्भवयोर्निमित्तभेदसंभवोप्यत्वात्‌· तेजस्त्वस्य रूपवद्धर्मिद्रव्यत्वसाक्षाद्व्याप्यजातित्वेनोद्भूतरूप
स्पर्शवद्वृत्तित्वात्‌। नवोद्भूतरूपस्पर्शयोर्विरोधः जलपृथिव्योरुभयसत्त्वात्‌ [illegible] तेजसि विरोधस्येनि
मित्तभेदोपाधिकत्वादिति। उद्भूतरूपसहचरितयोर्महत्वानेकद्रव्यवत्त्वयोर्पुगनद्भवादित्ययान्वयव्यतिरेकतुल्यत्वे
प्यनेकद्रव्यवत्त्वमुभयवानद्रव्यत्वात्कुषप्रत्यक्षत्वेनैवं किंतु महत्त्वमेवला घवात्‌· अनेकद्रव्योत्कर्षविनापि तत्त्व
कादेश्च वपजन्या त्कृष्टपरिमाणात्प्रत्यक्षोत्कर्षदर्शनाच्च· दूरस्थकेशाप्रशोद्व्याणुत्पादनमहत्वात्‌ प्राप्येवके श
स्पर्शज्ञानीप्रसंयोगेनानेकद्रव्यवत्त्वाद्व्यप्रत्यक्षतेत्यनेकद्रव्यवत्त्वं तत्रतंत्रमितिचेन्न अनेकद्रव्य संयोगित्वस्य
समवायेनप्रयोजकत्वात्‌· ननु संयोगेनातिप्रसंगात्‌· तथा वहत्‌ग्रहणेस्वाश्रयसंयोगस्यानेकद्रव्यवत्वेसहका
रितान्वयाव्यामहत्त्वएवास्तु· ननु परमाणुद्भूतरूपवत्त्वेमहत्त्वेव द्रव्यप्रत्यक्षतायां स्य रूपयोग्यता तदादिद्रव्यव्यवत्पां का ५१
रणानस्यादितिचेत्‌· नतदुत्कर्षान्प्रत्यक्षोत्कर्षणतयोः कारणत्वात्‌· नह्य कारणोत्कर्षमकार्यमनुविधत्ते उक्ता

धचित्‌ भावस्य विशेषणे स्येवं रूपेणेत्यर्थः। विशेषणतामिति। दंडपुरुषविशेषणतादौ तत्र समूहालंबन
विशेषणताया अपि भानेतद्विषयत्वकृतापि न। विशिष्टधियो विशेषवदित्यर्थः। ननु विशेषणतायामपि विशे
षणतास्ति सा च विशिष्टज्ञाने भासतेन तु समूहालंबनदूनितत्कृत एव विशेषः स्यादित्यत आह तत्राप्य
ति। तर्हि कानयो विशेषवदित्यत आह समूहेति। कारणकृतदिति। विशिष्टज्ञाने विशेषणज्ञानं कारणं। समू
हालंबनं युगपदुभयज्ञानसामग्री तदित्यर्थः। ननु विशेषणज्ञानस्य हेतुत्वेन कृतो विशेषः स्यात्तत्र न विशि
ष्टज्ञानत्वे समूहालंबनव्यावृत्तं कार्यतावच्छेदकमगत्यैवेति भेदकांतरमावश्यकमपेक्षणीयमित्यत आह कार्य
कृतदिति। अतद्व्यावृत्तिबोधलक्षणकार्यकृतन इत्यर्थः। ननुक्तं कार्यजनकत्वमपि समूहालंबनव्यावृत्तं विशि
– ष्टज्ञानत्वमप्रतीत्य दुर्ग्रहमिति भेदकांतरापेक्षा तदवस्थैवेत्यरुचेराह प्रकारकृतो वेति। दंड इति विशिष्टबुद्धौ दंड
प्रकारः समूहालंबने तु दंडवत्पुरुषत्वे दंडस्यापि तत्र विशेष्यत्वादित्यर्थः। यद्वा दंडी पुरुष इत्यत्र पुरुषानुयोगि
कवैशिष्ट्यप्रतियोगित्वलक्षणं विशेषणत्वं दंडस्य विषयः। तादृशवैशिष्ट्यानुयोगित्वं विशेष्यत्वं पुरुषस्य विष
यः। समूहालंबने तूभयोरपि विशेष्यत्वमेवेत्यर्थः। न च पूर्वोक्तानवैशिष्ट्यप्रतियोगित्वादिकं यत्र तत्र स्फुरेदिति वाच्यं॥
विशिष्टज्ञानसामग्री महिम्ना भूत लेपवत्‌ भावदूनि ज्ञानेसावत्वप्रतियोगित्वादिवत्‌ अन्यनगत्या पूर्वोक्ता
तस्यैव तस्य प्रस्फुरणाभ्युपगमादित्याहुः। आनायन विद्वान्नांकतेषकारोपीति। सवेति। तथाच पुरुषादि धर्मिनि

प्र॰वि॰प्र॰ ष्ट विशेषणता विशेषविषयत्वकृतएव विशिष्टज्ञाने विशेषइति भावः। पूर्वोक्तदूषणेनैव निरस्यति तन्मात्रा
यापीति॥ ॥ उपोद्घातसं॥ तिमाहुनन्विति। व्यावर्त्येति। तद्वत्तादर्शिनो वर्णस्येति शेषः। अन्यथाख्या
॥६२॥ ताविति। ज्ञानस्य व्यधिकरणप्रकारकत्वमानाभावादित्यर्थः। रजताथीति। सत्यस्थलीयं सामानाधिकरण्य
मादाय सिद्धसाधनं मास्तु दत उक्तं व्याप्यमिति। तथाच नियमो व्याप्यत्वेनानुभूयमानत्वमुपरितनार्थिप्रवृत्ति विषय
तादृशानुभवविषयत्वमायातीत्यन्यथाख्यातिसिद्धिरित्यर्थः। ननु व्यापनये सर्वरजतमिति नृत्तनमाहार्यरूप
त्वाद्यादिरूपं वा संभवतीति तदादाय प्रमेयत्वादेरपि पक्षसमत्वाद्व्यभिचाराभावात्कर्मत्वादित्यत्र हेतुरिति चेत्
न। रजतत्वप्रकारकप्रवृत्तिजनकत्वेन रजतत्वप्रकारकानुभवस्य विशेषणात्। एवंच प्रमेयत्वादावेव व्यभिचार
वारणाय पूर्वप्रतीकमिति मंतव्यं। अंशासिद्ध विवक्षया चेने ‍ स्थरज्ञानेनार्थान्तरेन वा पूर्वदोषतादवस्थ्यं॥
तर्कसत्वाज्ञ न साध्य हेत्वोर्व्यर्थविशेषणत्वमिति भावः। रजतमात्रेति। रजतविशेष्यमात्रवृत्तिधर्मवदित्यर्थः॥
तेन न साधनवैकल्यमिति ध्येयं। अप्राप्तेति। शुक्तौ रजतत्वप्रकारकानुभवविषयो न वेति विप्रतिपत्तेरेतादृशाभि
धानस्यात्र धर्ममनाकांक्षितत्वादिति भावः। अप्राप्तकालत्वमपुरुषदोषत यावक्तृदोषमादुरजतमात्रेति। ना
नुमात्रपदं व्यर्थं। न व साधनाव्यापकत्वार्थं तदितिवाच्यं। रजतवृत्तित्वस्यापि रजतारजतादि वृत्ति विषयमा
त्रवृत्तितत्त्वनित्वादौ साधनाव्यापकत्वादिति चेत्। अत्राहुः॥ एतन्मतेऽपि साध्ये ‍ त्याद्यपकृतयोपाधेर्दूष
कत्वेन मते पक्षे ‍ ‍ नाव्यापकत्वार्थमात्रपदं। अन्यथा व्यतिरेकेऽप्यस्वरूपासिद्धिप्रसंगादिति। केचित्तु ॥६२॥

समव्याप्तोपाध्यभिप्रायेण मात्रपदं। न चयदुरजतमुत्पन्नं विनष्टं वेन ‍ तत्रापि रजतत्वस्यर
तेऽस्तित्वस्य तादृशानुभवविषयत्वव्याप्यत्वं नास्ति तन्मते दुष्य ‍ काम्यादिनि वाच्यं। रजतत्वप्र
कारकशब्दादिबुद्धिविषयत्वस्य तन्मतेऽत्रापि सत्वादिति भावः। एतद्व्यभिचारेण ‍ साध्ये बोध्यो। विवक्षिते
च समव्याप्तत्वमपि नेति ध्येयं। अप्राप्तकालत्वं यथा न स्यात्तथादुष्टमुक्तिरिति। शुक्तिवृत्तिरजता ॥ ति
र्थिवृत्तिजनकज्ञानविषयतेत्यर्थः। रजतार्थितावच्छेदकेति। तु ज्ञानविषयतात्वादि ‍ त्यर्थः।
न न प्रमेयत्वप्रकारिकायां रजतत्वत्तादृशं विषयतायां व्यभिचारः। रजतवृत्तित्वपीति। विषयतात्वरूप
पक्षधर्माविच्छिन्नसाध्यव्यापकमिदं बोध्यं। अरजतविषयेति। यद्यपि प्रकारत्वादित्येवास्तु न चेत्
वादौ व्यभिचारः। आहार्यादिभ्रममादाय तस्य पक्षसमत्वात्। तथापि रजतविशेष्यवृत्ति प्रकारविशे
षस्य यस्यारजतेकदापि नाहार्यादिरूपो व्यारोपस्तत्र व्यभिचारवारणाय पूर्वरजतीकमिति ध्येयं। रज
तारवृत्तित्वमिति। अरजतवृत्तित्वमित्यर्थः। तेन द्रव्यत्वादौ न साध्याव्यापकत्वं। रजतारवृत्तित्वमिति। रजा
तमात्रवृत्तित्वमित्यर्थः। तेन द्रव्यत्वादिप्रकारकविषयतायां न साध्याव्याप्तिः॥ न च साधनव्यापकत्वं रजत
निष्ठस्मरणविषयतायां तन्मते साधनाव्यापकत्वात्। केचित्तु विशेषणविशेष्यभेदेन विषयताभेद इति मते
भ्रमस्थले रजतमात्रवृत्तिविषयताभयसंमतानत्र साधनाव्यापकत्वमित्याहुः। विषयतायामिति। व

वे

प्र.मु. यैतिन्नोषः। तथा चाश्रयासिद्ध्यादिकमिति भावः। विशेषणदलमिति। भुक्तिनिष्ठप्रवृत्तिजनकमित्यर्थः॥
॥६३॥ एतच्च भागे बाधवारणाय। अंन्यातः। सिद्धसाधनवारणाय एतज्ज्ञानमिति। एतद्भागस्याधिकस्यज
वेशाद्वितीयपक्षताावच्छेदकत्वव्याप्तिर्न इदं चायामेव सिद्धसाधनाय निरपास्ता। भुक्तावितिः। निर्विषयकमनो
६३ योगादौ व्यभिचारवारणाय ज्ञानपदं। अदृष्टाद्वारकेऽपि विशेषणं। तेनादृष्टद्वारकं ज्ञानेन जन्मांतरीयेण न
व्यभिचारः। न च फलज्ञाने व्यभिचार इति वाच्यं। प्रवर्तकत्वं हि प्रवृत्तित्वावच्छिन्नकार्यताप्रतियोगिककारणता
श्रयत्वं। फलज्ञाने तु पायेच्छायां हेतुर्न प्रवृत्तित्वावच्छिन्ने प्रकृत्यभावेऽपि इष्टे फलज्ञाने दोषसत्त्वेऽरित्याह।
असिद्धिरिति। आश्रयासिद्धिरित्यर्थः। विशेषणाभावाय न विशिष्टाभावात् नेदृशत्वे सिद्धिः। अप्रसिद्धविधि
करणेऽव्यतिरेकाज्ञानात् संज्ञाभावो निरूप्यत इति सिद्धांतादिति। एतच्च स्वमतेनाभिप्रायेण प्रयो
जकत्वाभिप्रायेण प्रयोजकत्वमिति भावः। भुक्तीच्छेति। एतेनवप्रकारकज्ञेऽपि प्रयोजकत्वं तदप्रकारकज्ञा
नविषयत्वमित्यर्थः। तदतिरिक्तविषयताश्रयत्वमित्यर्थः। तस्यानिरस्तत्वाभिधानेऽनेदस्य स्वरूपत्वात्। एतदर्थि
ताऽन्यप्रवृत्तिविषयत्वादितीदं वर्थः। स्वरूपेति। स्वपदसंबंधिपदत्वमद्धिस्मान तत्प्रवृत्तिपरं। धर्मिपदं वेष
यपरं। एतदर्थितेति। अंन्यातः। सिद्धसाधनवारणाय संप्रदायमते नेदं तदर्थमेव श्रुत्वा वित्यपि। इष्टेति। यद्यप
प्रवृत्तिसमासे दृष्टांतासिद्धिः कर्मधारयेऽपि बाधस्तथापि दृष्टपदस्य पक्षतावच्छेदकपरत्वे दृष्टतावच्छेदकप्रकारक
प्रवृत्तिविषयविशेष्यकज्ञानसाध्येत्यर्थः। न चेदं यत्र प्रवृत्तिविषये च्छाभेदज्ञानात् प्रवृत्तिस्तत्र व्यभिचारः। अ ॥६३॥

रो २
भेदरूपत्वे निष्प्रतियोगित्वे तस्यैव तत्प्रकारत्वे न तु तत्त्वावच्छेदकं … [illegible]
अत एव यत्र सर्वगतं तत्र … [illegible]
तावच्छेदकरूपतया … [illegible] … स्यात्पर … [illegible]
तयोर्भेदः। अन्यथाऽननुगमेन प्रवृत्तिलक्षणकार्यस्याकस्मिकता … [illegible]
इष्टाप्रकारकत्वं तथा चेष्टाप्रकारप्रकारकप्रवृत्तिविषयविशेष्यकज्ञान … [illegible]
ज्ञानस्थले दृष्टस्यैव प्रकारत्वापगमेऽपि ज्ञानेच्छयोः समानप्रकारकत्व … [illegible]
प्रकारकतया तादृशज्ञानस्य … [illegible] … अन्यथा … [illegible]
ज्ञानसाध्यप्रवृत्तौ व्यभिचारतादवस्थ्यापत्तेः। कुतश्चित् … [illegible]
भेदमात्रस्यैव संसर्गत्वेन तत्प्रतियोगितया … [illegible] … नीलो घट इत्यादौ … [illegible]
… न स्यादिति युक्तमुत्पश्यामः। ननु यत्किंचित्प्रवृत्तिविषय … [illegible]
नप्रवृत्तिविषयतो … न नुगमइतिचेत्॥ अत्राहुः। तादृशज्ञानप्रवृत्तित्वावच्छिन्नसामान्ये न
रूपेण हेतुः। तत्प्रवृत्तिं प्रति तदेव विशेषरूपेण। तथा च ज्ञानेऽप्रवृत्तिविषयत्वेन सामान्येनैव रूपेण न
… साध्यत्वे न्यात्। नाननुगमः। न चार्थांतरं। न तत्प्रवृत्तिं प्रति समानविषयकतादृशज्ञानस्यैव हेतुत्वाव

घ्रुक्तौति

यद्वेति। अनुमानेबाधकारणाययपक्षविशेषणं। तत्र रजतेच्छाजन्यत्वे स्वरूपकथनपरं। पक्षद्वयेतात्पर्यमित्यप्याहुः प्रयोज कत्वमदृष्टा
द्वारकं बोध्यं। ननु प्रयोजकत्वे कारणकारणेप्यस्त्वीति रजतस्मरणस्य वारोपकारणेऽव्यभिचारहृदयमुक्तेराह
अंशेनेत्यादि साधनतावच्छेदकप्रकारकवैशिष्ट्यावगाहिरिति

चिं०म०

॥६४॥ धारणेन भिन्नविषयकरजतस्मरणमादाय बाधेन साध्यस्य पर्यवसानाभावात्। अत एवेश्वरानुमाने
समदादियत्किंचिदुपादानप्रत्यक्षेणनार्थान्तरमिति। प्रवृत्तित्वादिति। चिकीर्षाजन्यप्रवृत्तित्वादित्यर्थः। चिकीर्षा
प्रयोज्यज्ञानविशेषस्यैव वा लिंगत्वे तेन नेश्वरप्रवृत्तिजावनप्रयोजनत्वादोषाभिचारः। नवेति। यद्यप्ये
तत्कृत्वादौ साध्याव्यापकं तथापि साधनावच्छिन्नसाध्यव्यापकत्वं बोध्यं। एवं च सति उपाधौ प्रवृत्तिजनक
त्वसम्बद्धत्वोपाधि सिद्धायेण अन्यथा तत्र तदनुपादेयमेवेति भावः। साधनेति। वक्ष्यमाणतर्केण सा
धनेव्याप्यत्वं प्रमितं तथा च साधनेन व्याप्येन घटितत्वान्नायमुपाधिः। साध्यव्याप्या व्यापकत्वेन साध्या
व्यापकत्वादित्यर्थः। कार्यपक्षकमुक्त्वा कारणपक्षकमाह हेतुत्वमपीति। तथा च प्रसाध्यांगकैतादृशज्ञा
न प्रवृत्तिजनकत्वमेव लिंगमस्मिति भावः। तथाविधमिति। रजतार्थितजन्यप्रवृत्तिप्रवृत्तिजनकमित्यर्थः।
रजतेनेवेति। नवरजतेच्छाहेतुज्ञानत्वादित्येवास्त्विति वाच्यं। यथोक्तविशेषणविशेष्यभावस्याभावात्। तस्येद
त्वेनरूपादिति भावः। नवेति। पुरोवर्तिकेध्वानपूर्वकानुमानेरजतस्मरणेपक्षो विशिष्टज्ञानेनादिनाय
पिध्दत्वेपक्षो विशिष्टज्ञानं वा। आद्येऽधीधोऽस्योसाध्याय्यसिद्धिरित्यर्थः। ननुनापनयेविशिष्ट
ज्ञानत्वे वैशिष्ट्यविषयकज्ञानत्वं। परेषां तु नीदत्तांतदितिसाध्यानुगमस्तु यत्र आरूप्यत इति। वि
शिष्टज्ञानत्वेन साधारणेन रूपेण सावधानानाम्। नच्चेयबांधाद्दृकूलेनचान्तरादिकूलरूपेण साध्यतासिद्ध्यर्थः॥ ॥६४॥
अन्यथा वह्न्यादावणुपुंजत्वाविभक्तो प्रसिद्धानुमनमपि नस्यादिति भावः। अग्रहीतेति। ननु इदं
हि

नै३ नवा२

पुरुषस्यऽयोगादूतिसमूहालंबनेऽतिव्याप्तिः नच तत्रापि संसर्गग्रहरवे निवाच्यं। इदंसंसर्गविति पुरुषेतदसं
सर्गग्रहेऽन्यथाख्यात्यापत्तिः एवं चानिर्धिकत्यकाऽभ्युपगमे तत्राप्येतिव्याप्तिः अथ धर्मधर्मिविषयकत्वंवि
शेषणविशेष्यभावविषयकत्वं समूहालंबनेदंहुस्य विशेषणत्वं पुरुषस्य तन्निरूपितविशेष्यत्वं विजय। नच
विशिष्यभानेधासमानवैशिष्ट्यप्रतियोगित्वादिरूपविशेषणत्वादि विशिष्टज्ञ.. नैपिकथं ... तत्तामिति वाच्यं।
समवायाभानेप्यतद्व्यावृत्तिनिरूपस्य वासंबंधविशेषस्य परेणापितद्विषयत्वेनाऽभ्युपगमात्। अन्यथा व्यधिक
रणप्रकारकज्ञानस्यायमिमर्ग्रथ व्यापत्तेरितिचेत्। न। अग्रहीतेत्यादिविशेषणस्यैवं व्यर्थतापत्तेः अपि
मेलाव समूहालंबनस्य वैलक्षण्यदात्। नचैवनेदंरजतमिति ज्ञानस्याऽजतेवि विशिष्टज्ञानत्वा ... रेति वाच्यं। अनादिर
जतांशेरजतत्वविशिष्टज्ञानत्वमापाद्यं। पुरोवर्तिनिरजतत्वेनैव विशिष्टत्व वा। न। धः दुस्थापत्तेः नायम् ते
योर्धर्मधर्मिभावानवगाहनात्। नच्चियर्ति किंचिन्निरूपितधर्मधर्मिविषयत्वं विवक्षितं। तथा सति प्रमेयवान्नित्य
स्यपुरोवर्तिनि प्रमेयत्व विशिष्टज्ञानत्वापत्तेः। एवंपदमप्यकिंचित्करं। धर्मधर्मिभोपरत्वस्य प्रत्येकज्ञा
नासंभवेनज्ञानद्वयेऽतिव्याप्त्यसंभवात्। तस्मादेतच्चिंत्यमिति। कुत्रचित्त्वातिरिति। कुत्रिरजतेदूतिवकु
परख्यातिः स्यात् नत्वसद्वैशिष्ट्यविषयकत्वेनान्यथाख्यातिः वैशिष्ट्यविषयकत्वान्भ्युपगमादित्यर्थः।
यद्यपिसमवायाविषयकत्वेपिवैशिष्ट्यांतरविषयत्वमभ्युपेयमेव। अन्यथा व्यधिकरणप्रकारकत्वासं
भवात् तथापिअसद्वैशिष्ट्यविषयकत्वेननभ्रमत्वं भ्रमविषयाणां सत्त्वात्। किंतु व्यधिकरणप्रकार
कत्वेनैवेत्याशयेनाह व्यधिकरणेति। ज्ञानपदकानुमानद्वयउपाधिमाशंक्य निराकरोति नचेति। प्र

६

सिं०प्र०श

थानुमाने साध्याव्यापकत्वमादस्तु दुष्टज्ञाने [illegible]ति। द्वितीये त्विदं रजतज्ञानवदिति। भ्रमात्तदृति। मन्मते भ्रम एव
॥६५॥ भगवज्ज्ञाने वा साध्याव्यापकत्वमिति भावः। तथात्वादिति। दोषाजन्यत्वादित्यर्थः। तथा च साधनव्याप
कत्वमित्यर्थः। अन्यथेति। ज्ञानस्य दोषजन्यत्वदृष्टेऽर्थः। तयोरिति। भ्रमस्थलीययोरिदं रजतज्ञानतत्स्म
रणयोरित्यर्थः। परेरापीति। तथा चावश्यकत्वात् स एव हेतुरिति भावः। पुरोवर्त्तीति। ननु रजतत्वेने
दं रजतमिति ज्ञानादपि प्रवृत्त्यापत्तिः। अन्यथाख्यातिमते नत्रापि ग्रहणस्मरणात्मकज्ञानद्वयस्वी
कारे रजतप्रतियोगिकस्मृतेः पुरोवर्त्तिरजतनिष्ठभेदाविषयत्वात् रजतभेदेऽप्रतियोगित्वज्ञानेपि तस्य पु
रोवर्त्तिनिष्ठत्वाभावात्। न चस्मात्तं च विशेषणेनैव नायं दोष इति वाच्यं। तद्भिन्नाभावविशेषणत्वेनानुप
स्थितत्वं। अभावप्रतियोगी इदं रजतमिति ज्ञानादप्रवृत्त्यापत्तेः किंतु पुरोव[र्त्ति]त्वेन गृहीतभेदविशेष
णत्वेनानुपस्थितत्वेत्वव्याप्यस्यैवेति कथं नातिप्रसंग इति चेत्। न। पुरोवर्त्तिनिष्ठभेदइस्य पुरोवर्त्यग्र
हीतासंसर्गे भेदे इत्यर्थः। एवं च पुरोवर्त्यग्रहीतासंसर्गेहितायच्छेदकाभावज्ञानस्यापि प्रतिबंधकतया त
दभावोपि हेतुः। एवं चात्र वा नस्य संकुचयदृत्याहुः। अत्र जमेयार्थिनां नादृग्ज्ञानाप्रसिद्धो नरभावाप्रसि
द्धेः कथं प्रवृत्तिरिति चिंत्यमिति। वस्तुतस्तु पुरोवर्त्यग्रहीतासंसर्ग भेदप्रतियोगित्वेनानुपस्थितत्वमिदं त्वा
तंच्यंतादृशात्यंताभावप्रतियोगित्वेनानुपस्थितत्वमित्तावच्छेदकं तदिति ध्येयं। [illegible]त्वमिदं भेदप्रति
गि रजतमिति ज्ञानाद्धुक्तौ प्रवृत्तिर्न स्यादिति दोषः। तथापि पुरोवर्त्तिनि भेदविष[illegible]योजकोऽसंसर्ग ॥६५॥

श्री १

ऽ५२

ति ४

ग्रहो विवक्षित इति केचित्। अन्ये तु तदग्रहीतासंसर्गत्वं तत्र साकांक्षत्वे तद्व्यावर्त्तकत्वेनोपस्थि
तत्वमित्याहुः। न चेच्छेति। शिलापादयोः भेदविषयकधीसाध्यत्वादित्यस्य निषेधति नचेति। इ
च्छादीनां शुक्तिरजतादिमात्रविषयत्वेन भेदविषयत्वमसिद्धमित्यर्थः। अभेदाभिरूपव्यवहारस्य त
द्विषयकधीसाध्यत्वेपि शुक्ताविदं रजतमिदं रजतान्न भिन्नमिति ज्ञानाभेदस्यासंसर्गग्रहादेवो
पपन्नत्वान्न विशिष्टज्ञानापेक्षेत्यर्थः। अभेदेति। एतच्चाध्यपेयाकेवलस्तनः शुक्तिबालकादिवाक्येष्वभि
चारादति त्वापेसमानविषयकधीसाध्यत्वेनेति ध्येयं। भ्रमत्वेनेति। यथाऽऽभाप्यन्नीदाक्ष्यन्न
भेदज्ञानं प्रवर्त्तकं तथा तच्छून्यभेदग्रहविरहो ममापि। स्वच्छत्वेनाभेदानुमितिस्थले पक्षत्वेत्यर्थः। प्रति
बंधकाभावस्य कारणत्वाभ्युपगमेनाक्लिष्यस्माकं न सिद्धो दिश्यनुन्यायेनादृयद्वेति। दुष्टभेदावि
षयकमिति। तच्चात्र पूर्वं पश्चेत भेदग्रहस्य येपि स्वेनाभेदानुमितिरूपसत्त्वेवेति भावः। ननु पर्वतो दिप ॥वा५
स्तावच्छेदकवत्पूर्वज्ञानोपनीतः श्वेतभेदः पक्षीभूतेऽश्वेत्वेनाभेदानुमित्याविषयीकर्त्तव्य एवेत्या
कप२ र्थो निराकरोति। न चेति। अविरोधिनोरेवैकनिष्ठप्रकारत्वं प्रकृते च न तथात्वमिति भावः। अत एवेति ति
नएवाभेदज्ञाने भेदो न विषयोऽत एव पूर्वं व्याप्यप्रतीची भेदप्रत्यये विद्यमानेपि स प्रत्ययो न भेदग्रा
ह्ली न तदुत्तरकालीनदोषजन्यप्रतीच्य भेदज्ञाने स्वविषयीभूतभेदविषयत्वकार इति केवलज्ञतीच्य

दिं.प्र.भा. भेदविषयो दिङ्मोहो जायते। अन्यथा तत्रापि भेदाभेदविषयक एव प्रत्ययः स्यात्। एवं चन्द्रबि-
म्बादिस्थलेऽपि जले चन्द्रद्वयवद् द्वित्वप्रत्ययानन्तरं दोषजन्यश्चन्द्रद्वयवद् भेदमात्रगोचरः प्रत्यय उपलभ्य-
६६॥ त इत्याहुः। केचित्तु यत एवं दुष्टं भेदाविषयकं ज्ञानं प्रवर्तकं अत एव दोषबलेन भेदग्रहप्रत्ययेऽपि स्व-
योग्यत्वेन प्राप्य भेदग्रहप्रत्ययो न प्राचीभेदग्रहादीति प्राच्यर्थिप्रवर्तकः एवमादर्शे मुखमिति
भ्रमेऽपि आदर्शत्वेन मुखाभाववदनुमितिः न मुखाभाववद्देशादिरिणीति मुखाभावा-
र्थिप्रवर्त्तिकेत्यर्थः। दिङ्मोहो दोषसति प्रत्ययादुक्तानुमितिरूपाः प्रवर्तकादिति त्रोषदूषयाहुः ॥
सोपीति। यथा शुक्तौ रजतत्वासंसर्गाग्रहः तथा तद्विषयकज्ञाने रजतविषयत्वासंसर्गाग्रहोऽपि दु-
रर्थः। बाधस्यापीति। पुरोवर्त्ति निरजतत्वाभावासंसर्गाग्रहरूपत्वात्तस्यापि विशिष्टज्ञान-
त्वमानाभावादित्यर्थः। तथा च बाधशून्यानुव्यवसायबलेन यदि विशिष्टधीः स्यात् शुक्ता-
वपि स्यादतो न सतः सा प्रमाणमिति भावः। तद्ग्रहीति। आधारजनत्वानुभवदूत्यर्थः। प्रागि-
ति। तज्जन्मनीति शेषः। वस्तुतस्तु तदानीमुत्पन्ने चैत्रादिविशिष्टबोधे न स्मरणे साधावना पीति
ध्येयं। ग्रहणे चेति। तथा च सामग्र्येव विशिष्टबुद्धौ मानमित्यर्थः। ज्ञातीति न्यायरत्नो को मि- ६६॥
थ्याज्ञानाभावेऽपि संशयव्यवहारं समर्थयति इत्येकदेशि इति। भ्रम या वृत्त्यर्थमनवेति। एवमपि र-

जतत्वे नेदं रजतं किंतु शुक्तिरिति। भ्रमे संशयत्वापत्तिरित्यत्र स्वतन्त्रोपस्थितेत्यनेकविशेष-
णे एकस्मिन् धर्मिणि इत्यपि बोध्यं संशय इति व्यवह्रियत इति शेषः। तेन न समानु-
पपत्तिः। युगपद्विशेषणफलमाह न चेति। ननु स्थाणौ स्थाणुपुरुषत्वज्ञानानन्तरं अयं पु-
रुष इति धर्मेऽस्ति धर्मानुरोधात् पुरुषभेदाग्रहोऽन्यथाख्यातिभिया स्यात् भेदाग्र-
हे तिष्ठशयापत्तिरित्याशङ्क्य निराकरोति नवेति। संशयो ग्रहजन्यत्वे च तस्य विरोधदर्शनजन्य-
त्वेनावधारणात्मकतया दोषप्राबल्येन बाधुरुष एव न स्थाणुरिति तत्रैव भ्रमः। तथा च स्थाणुको-
टौ न स्यात् न्यमितिनोक्तदोषदुष्यात्सदोषेति। यद्यपि धूमभ्रमो न वह्नित्वकारणं तथापि मध्य-
वर्त्तितासाधर्म्यग्रहणमित्युक्तं। लिंगज्ञानेति। यद्यपि तन्मतेऽनुमितित्वजात्यभावेन लिंगज्ञान न
जन्यत्वेनैवानुमितिनोमीत्यनुव्यवसायोन्यत्रापि सच्च नारोपस्तथाप्यत्र लिंगज्ञानस्य निर्वाहित्वस्य
तंत्रोपस्थितिमात्रज्ञप्तिबोधकत्वं। ननु पर्वतानुभवजनकत्वे अन्यत्र तु तथेति। लिंगज्ञानं जन्य-
त्वस्याप्यत्रारोप एव अत एव तदनन्तरं भावित्वमात्रमुक्तमित्याहुः। ननु शुक्तौ रजतभेदाग्र-
हात् यथा प्रवृत्तिस्तथा शुक्तिभेदाग्रहान्निवृत्तिः स्यात्। तत्राह अन्यथाख्यात्यापत्तेरित्यत आह

वि॰प्र॰म

॥६२॥

एवमिति। नेनेति। एतच्चोपलक्षणं इदं रजतमित्येव यत्र ज्ञानं तत्रोपस्थितत्वाभावात् भेदाग्रहो न नि-
वर्तक इत्यपि बोध्यं। यद्यपि धर्मिज्ञानरूपा शुक्त्युपस्थितिस्त... पेतथाप्य निष्टतावच्छेदकप्रकारेणोपस्थि-
ता निष्टभेदाग्रहो नास्तीति भावः। न शुक्तिरित्यत्रापि प्रतियोगिस्मृतिमादायैव यद्यपि स्वतंत्रो-
पस्थितत्वमस्त्येव तथापि भेदग्रहकाले नास्तीति न तदनंतरं न निवृत्तिः। न च रजतं नेदं रजतमिति भेद-
ग्रहकाले प्रतियोगिस्मृतिकालीनस्वतंत्रोपस्थितरजतभेदाग्रहमादाय प्रवृत्त्यापत्तिरिति वा-
च्यं। प्रतिबंधकाभावत्वेन तस्य हेतुत्वात्। तस्य च कार्यसहभूतत्वेन हेतुत्वादिति भावः। वस्तुतः शुक्ति-
भेदादेर्विशिष्टस्यैव स्मृत्युपनीतस्य तत्रासंसर्गाग्रहस्तु तिनश्यति योगिस्मृत्यपेक्षा अतएवाग्रहस्तु
त्यु भावेति। स्यैकदेशिमतं दूषयति अनिष्टाभेदग्रहस्येति। यद्दानच्च निष्टाभेदग्रहस्येव निवर्त-
कत्वे प्राभाकरमते को दोषो येन तदेव नाभ्युपेयत इत्यत आह अनिष्टाभेदग्रहस्येति। अत्रेति प-
दपूर्वं किंतु शुक्तिरिति निर्देशः। अन्यथेति। शुक्त्यभेदग्रहाभ्युपगम इत्यर्थः। अतएवेति। स्वातंत्र्य-
विशेषणादेवेत्यर्थः। तथा च स्वतंत्रभेदाग्रहे स्वातंत्र्यविशेषणादिदं रजतमेव नेदं रजतं किंतु शुक्ति- ॥६२॥
रिति... भेसनियथा न प्रवृत्त्यन्यथाख्यानीत था निवर्तकभेदाग्रहेपि स्वातंत्र्यविशेषणात्त-
दौ रजतं नेदं न शुक्तिरिति ज्ञाने सतिन निवृत्त्यन्यथाख्यातीत्यर्थः। रजतभेदेति। रजतेर-
जतभेदसंसर्गाग्रहेत्यन्यथाख्यातिः साधनाभ्युपेयत इति भावः। तुल्येति। स्वतंत्रोपस्थितेर-

निष्टोभयभेदाग्रह इत्यर्थः। अन्यथेति। यद्यप्यस्मन्मतेनत्र भेदग्रहाना संतापः अन्यथाख्या-
तिरित्युक्तं तथापि यत्र देवान्नभेदग्रहः किं विमेरं गरजतेद्युत्येव निश्चयः तत्र संतापापत्तिर्बो-
ध्या। न च स्मन्मते तद्धर्मज्ञानजन्यकोटिद्वयस्मरणास्य तत्र संशयजनकत्वमतोने। कदोषइत्य-
त आह यदेवेति। तद्दि यद्धर्मज्ञानाद्युपस्थितिस्तद्भेदाग्रहः प्रयोजक इति द्वितीयभेदाग्रहः
सत्यपि किंचित्करइति भावः। यस्त्विति। नेदं रजतमिति बाधः अख्यातौ भेदाग्रहपक्षे न युज्य-
ते किंत्वन्यथाख्या... तिपक्ष एव। प्रसक्तस्यैव प्रतिषेधात्। प्रसंगस्य चारोपरूपत्वादित्यर्थः। वि-
परीतमिति। अन्यथाख्यातिपक्षे ज्ञानयोर्बाध्यबाधकव्यवस्थैव न स्यादित्यर्थः। तदेव दर्शय-
ति परस्परेति। न वो तत्त्वमेव बाधकत्वे बीजमित्याशंक्य... णापीति। यदनेन वाच्यं तद् सत्यमित्या-
शयात्कथादित्यर्थः। कस्तर्हि बाध्यत इत्यत आह तस्मादिति। अन्यथाख्यातौ दूषणांतरमाह त-
दीयतेति। समूहेति। धर्मधर्मिभावानापन्नो भेयो यज्ज्ञानस्य समूहालंबनत्वनियमादिति भा-
वः। प्रतीत्येवेति। प्रतीतिस्वभावेनैवेत्यर्थः। परस्मिन्निति। अन्यस्मिन्नन्यधर्मवैशिष्ट्यनभा-
सनइति प्रतीतिस्वभावइत्यर्थः। विषयमिति। पुरोवर्तिनि रजतत्वाभावात् ज्ञानाकारस्यैव
रजतत्वस्य तत्र भानाभ्युपगमादित्यर्थः। असंनिकृष्टरजतत्वभानाभ्युपगमे वासमूहालंबे

प्र.भ.
॥६८

बनत्रापत्तिरिति भावः। दोषांतरमाहुर्ज्ञानेति। दोषजन्यत्वं स्वरूपसद्भिन्नासाय ज्ञानं वा
आद्ये भ्रमादिति। अंत्येनाप्नोति। योग्यतादीति। स्वमतावष्टंभेणेदं बोध्यं। नयतत्रापि लिं
गाद्यसंसर्गाग्रहस्यैव हेतुत्वमस्त्विति वाच्यं। लाघवेन विशिष्टज्ञानस्यैवानुमित्यादिहेतुत्वा
दिति भावः। ननु भ्रमस्थले दोषस्य विपरीतकार्यजनकत्वं दृष्टमित्यत आह भ्रमकं वेति। व
ह्निरिति। वह्निस्पर्शस्योद्भूतवद्भूत्यर्थः। अन्यत्र तु न तथा अत एव न भस्मदाहइति भावः। स्वर्ना
ग नतुद्भूतविशेषः नचैतत्प्राहुः। यतः व्यतिरेकन्यथाव्यधिकरणप्रकारिकानेष्टा। तोयथा
र्थे तिर्योजना। नव्यधिकरणेद इति न परस्परव्यधिकरणप्रकारकं। नविषयताव्यधिकरणप्रका
रकैवेत्यर्थः। शुक्तौ छायामिति। ननु तत्रापि छायाद्वये भेदाग्रहो ज्ञानवदेववेति किंन स्यादिति
चेत्। अत्राहुः। इच्छायामिष्टतावच्छेदकेष्टसाधनतावच्छेदकान्यतरप्रकारकत्वनियमा
त्केवलेदेवप्रकारकत्वाभावेनान्यगत्याव्यधिकरणप्रकारकत्वं ज्ञाने तु न तथेति। अ
त्र बहुभावत एव त्राणां। पक्षविकल्पभयादाह ज्ञानत्वमिति। व्यधिकरणप्रकारके ज्ञा
ने त्रिगुणत्वादोष्यपि शरारादाहमात्रेनि। प्रमात्ववत्। इदंत्व प्रमात्ववदित्यर्थः। यद्यपि वि ॥६८

षयतायानिरस्तत्वादिफक्कमस्ति तथापि परमते नेदं। इंद्रियत्वादिति। ज्ञानकरणमनःसंयो
गाश्रयत्वादित्यर्थः। प्रतिरोधइति। केवलान्वयिवद्विषयविरोधमात्रेण सत्प्रतिपक्षत्वं बोध्यं।
अन्यथाख्यातेरिति। तथा च बाधइत्यर्थः। ननु विषयभेदाग्रहस्सत्वेपि ज्ञानयोर्भेदे कथं न
तवमते प्रवृत्तिरिति निराकर्तुमुपसंहारव्याजेनाह एवं चेति। नयोग्यत्वादिति। संवादिविसंवादिव्य
वहारजननयोग्यत्वात्तदवच्छेदकं तु सदसत्संसर्गाग्रहत्वादित्यर्थः। अतिप्रसंगेति। भेदाग्रहे प्रवृ
त्तिप्रसंगवारणार्थमित्यर्थः। लाघवादिति। न्यूनत्वकारणतावच्छेदकांतरकल्पने लाघवं कल्पनीय
नत्वकारणतावच्छेदकांतरकल्पने गौरवमित्यर्थः। ज्ञानविशेति। ननु स्वमते प्रामाण्यस्य स्वतोग्रा
ह्यत्वापत्त्या व्यवसायविषयोप्यवैशिष्ट्यं नानुव्यवसायविषयः परमते च तदतींद्रियमेव तत्कथमेतदिति
चेत्। न। व्यवसायस्य वैशिष्ट्यविषयतां प्रसाध्यत्वमतानुसारेणोसिद्धांतादित्येके। वस्तुतो व्यवसायेऽभ
नीतत्वाविशेषेणावैशिष्ट्यमप्यनुव्यवसायविषयएव। अन्यथा घटत्वप्रकारकत्वमपि तत्र न भासे
त। भासमानवैशिष्ट्यस्यैव प्रकारत्वात्। नचैवं स्वतस्त्वापत्तिः। ज्ञानविषयतामात्रेण तद्ग्रहस्या कारि
त्वार्तत्र्येण तदस्या कारात्। तेनैव रूपेण तद्ग्रहकत्वस्य तद्धता निश्चयरूपत्वेन तद्घटित प्रामाण्यनि
श्चयरूपत्वादित्यन्ये। परमते च समवायांतींद्रियत्वेपि तद्भिन्नवैशिष्ट्यमध्यक्षमेव। अन्यथा प्रा

प्रतियोगित्व २

विं प्र० ५५
॥८५॥

माण्यस्य तत्त्वमपि तस्य न स्यात्। ननु सत्यरजतस्थले प्रथमं प्रवृत्तिरुक्तकारणताग्रहेऽपि प्रथ-
मं तत्रैव ति कुतो नियमः। कार्यकारणभावाज्ञानेऽपि स्वरूपसतस्तद्वज्ज्ञानस्य प्रवर्त्तकत्वात्। तथा च
यदि विसंवादिप्रवृत्तिस्थले एव प्रथमं हेतुताग्रहस्तदा तज्ज्ञानस्य वैशिष्ट्यागोचरत्वे कुतो वैशि-
ष्ट्यं ज्ञानविशेष्यतया ज्ञानोपस्थितिः किं स्यात्। भावे वा तत्र स्वतस्त्वान्यथाख्यातिसिद्धौ किं पु-
